# श्री कुमारी स्तोत्रं

जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ 1

त्रिपुरां त्रिगुणाधारां त्रिवर्गज्ञानरूपिणीम् ।
त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ 2

कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।
कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम् ॥ 3

अणिमादिगुणाधरामकाराद्यक्षरात्मिकाम् ।
अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ 4

कामचारीं शुभां कांतां कालचक्रस्वरूपिणीम् ।
कामदां करुणोदारां कालिकां पूजयाम्यहम् ॥ 5

चंडवीरां चंडमायां चंडमुंडप्रभंजिनीम् ।
पूजयामि सदा देवीं चंडिकां चंडविक्रमाम् ॥ 6

सदानंदकरीं शांतां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहम् ॥ 7

दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ 8

© 2022 Vedam Nadam

सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ।
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥ 9

॥ इति श्री कुमारी स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam